MSS No. 153 Subject Philosophy

Name of MSS Tatva Sangràhā
तत्वसंग्रह

Author - -

Period - - Folios 16 (001, 003 to 017)

Script Sanskrit Source Prithipal Singh

Missing Folios 002.

तत्त्वसंग्रह :अपूर्ण
१,३-९० पत्रक ॥ ल० अ० १३ पं० प्र० पृ०

ह० ला०



तं॰
प्र॰
१

ॐ श्रीगणेशाय नमः ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितं श्रीमत्तत्त्वप्रकाशाख्यं प्रणौमि सज्
गतात्मरूं ॥१॥ देहो नाहं श्रोत्रवागादिकानि नाहं बुद्धिर्नाहमध्यासमूलं नाहं सत्यानन्दरूपश्चिदा
त्मा मायासाक्षी कूटस्थ एवाहमस्मि ॥२॥ प्रथमो ज्ञस्य वाक्यार्थज्ञानाधीनत्वात्तस्य च पदार्थज्ञा
नाधीनत्वात्तदर्थं तत्पदार्थं निरूपयामः तत्पदार्थस्य लक्षणं द्विविधं तटस्थलक्षणं
स्वरूपलक्षणं चेति सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणत्वं यतो वा इमानि भूता
नि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः तदुक्तं भगवता सूत्रकारेण जन्माद्यस्य
यत इति सत्यज्ञानानन्दः स्वरूपलक्षणं सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेति व्यजानादित्यादि
श्रुतेः उक्तं च आनन्दादयः प्रधानस्येति स च द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति मायोपहि
तं चैतन्यं तत्पदवाच्यार्थः मायाविनिर्मुक्तं चैतन्यं तत्पदलक्ष्यार्थः अथ केयं माया उच्यते य
या ब्रह्मण्यद्वैते रज्जुसर्पादिकल्पितं तया चेतनेऽचेतनं कल्पितं इदं सर्वं यदयमात्मा आत्मैवेदं
सर्वं ब्रह्मैवेदं सर्वं एकमेवेदं विश्वं सर्वं खल्विदं ब्रह्म वासुदेवः सर्वं नारायणः सर्वमिदं पुरु
ष एवेदं सर्वमित्यादि श्रुतिस्मृति वाक्यशतैरचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात् चेतना
चेतनयोरभेदाध्यासाच्च चेतनं नित्यमखण्डमद्वयं सत्यं परमानन्दाद्वयं ब्रह्म अचेतनमज्ञा

सात्त्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रियाण्युत्पद्यन्ते आकाशस्य सात्त्विकांशाच्छ्रोत्रमुत्पद्यते वायोः शु॰ ९

स एव जीवः कारणोपाधिरीश्वर इति वचनादित्यर्थः सा अविद्या मायोपहितं चैतन्यमीश्वरः स च ज्ञा
नशक्त्युपहितस्वरूपेण जगत्कर्ता क्रियाशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानं ऊ
र्णनाभिवत् यथोर्णनाभिः सृजते गृह्णते चेत्यादिश्रुतेः यः सर्वज्ञः स विश्वकृत् स हि सर्वस्य
कर्तेत्यादिश्रुतिभ्यश्च एवं पूर्वोक्तादीश्वरादाकाश उत्पद्यते आकाशाद्वायुः वायोरग्निरग्नेरा
पः अद्भ्यः पृथिवि एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः मायायाः सत्वरजस्तमोगुणा
त्मकत्वात्तत्कार्याण्याकाशादीन्यपि सत्वरजस्तमोगुणात्मकानि अपञ्चीकृतानि सूक्ष्मभूतानीति
चोच्यन्ते एतेभ्यः एव सूक्ष्मभूतेभ्यः स्थूलसूक्ष्मभूतानि सूक्ष्मशरीराणि च सप्तदशलिंगात्म
कानि जायंते सप्तदशलिंगानि तु ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच मनोबुद्धिः पंचप्राणाश्चे
ति तथा च आकाशादिसात्विकांशात्वगिंद्रियं तेजसः सात्विकांशाच्चक्षुः अपां सात्विकांशाद्रसनं
पृथिवीसात्विकांशात्तु घ्राणं श्रोत्रमाकाशादित्यादिश्रुतेः आकाशादीनां सात्विकांशेभ्यो मिलिते
भ्योंतःकरणमुत्पद्यते तत्संकल्पविकल्पनिश्चयाभिमानानुसंधानरूपवृत्तिभेदाच्चतुर्वि
धं मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधं संकल्पात्मकं मनोरूपं बुद्धिर्निश्चयरूपिणी अभिमा
नात्मकस्तद्वदहंकारः प्रकीर्तितः अनुसंधानरूपं च चित्तमित्यभिधीयते इति वार्त्तिकवचनात्

त॰ सं॰ ३

पूर्वोक्तेभ्य आकाशादिरजसांशेभ्यो व्यस्तेभ्यः कर्मेंद्रियाण्युत्पद्यंते आकाशरजसांशाद्वागिंद्रियमुत्पद्यते वा
यो रजसांशात्पाणिः तेजसो रजसांशात्पादौ अपां रजसांशादुपस्थः पृथिवीरजसांशात्पायुः
आकाशादिरजसांशेभ्यो मिलितेभ्यो प्राणः उत्पद्यते सोपि वृत्तिभेदात्पंचविधः प्रागगमनवा
न्नासाग्रवर्ती प्राणः अर्वाग्गमनवान्पाय्वादिपाय्वादिस्थानवर्ती अपानः विष्वग्गमनवा
न्सर्वशरीरवर्ती व्यानः ऊर्ध्वगमनवान्कंठवर्ती उदानः अशितपीतान्नपानादि
समीकरणकरः अखिलशरीरवर्ती समानः वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि
तेषांकर्मेलेत्यादिश्रुतेः अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाः कोशाः पं
चो वेदांतेर्भवंति वर्तमानस्थूलशरीरमन्नमयकोशः उक्तसूक्ष्मशरीरं कोशत्र
येयात्मकं कर्मेंद्रियैः सहितः प्राणः प्राणमयकोशः कर्मेंद्रियैः सहितं मनो मनोमय
कोशः ज्ञानेंद्रियैः सहिता बुद्धिर्ज्ञानमयकोशः अयमेव कर्तृत्वोपाधिः विज्ञानं यज्ञं
तनुते कर्माणि तनुतेपि चेत्यादिश्रुतेः अंतःकरणस्य संतवृत्तिर्द्विविधा निश्चयवृत्तिः
संशयाकारवृत्तिश्चेति निश्चयवृत्तिमदंतःकरणं बुद्धिरित्युच्यते संशयाकारवृत्ति
मदंतःकरणं मनः तत् भोगोपाधिः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उ

मद्वमप्रतिंम र्को

र्दि

इदमेव कारणशरीरं महत्तत्त्वमि-
[illegible] त्यभिप्रेत्याह महदिति ६

अज्ञाने

अज्ञानपर्यंतः

त्मेतः पंचस्वानंदमयात्मा ब्रह्मपुच्छं प्रतिष्ठेत्यादिश्रुतेः अयमेव कारणपर्यंतमानंदमय
कोशः केचित् आनंदमयकोशं वदंति ६ इदं सूक्ष्मशरीरं सप्तदशलिंगं द्विविधं समष्टिव्य
ष्टिभेदात् अपंचीकृतपंचमहाभूततत्कार्यसप्तदशात्मकं लिंगं समष्टिरित्युच्यते एतदुप
हितं चैतन्यं हिरण्यगर्भ इत्युच्यते प्राणः सूत्रात्मेति च ज्ञानक्रियाशक्तिमदुपहित
त्वाद्व्यापित्वाच्च अथवा पूर्वोक्तापंचीकृतभूतेभ्यः सर्वव्यापकं लिंगशरीरं उपयोगेवो
त्पन्नं तदेव समष्टिरित्युच्यते समष्टित्वं नाम अज्ञानादिवत्सर्वत्र व्यष्टिष्वनुस्यू
तत्वं तदुक्तं तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं महदिति केचित्तु वनवल्लिंगशा
रीरसमुदायः समष्टिरिति वदंति प्रत्येकं लिंगशरीरं व्यष्टिरित्युच्यते व्यष्टित्वं
नाम व्यक्तिवद्व्यावृत्तत्वं एतदुपहितं चैतन्यं तैजस इत्युच्यते तेजोमयांतःक
रणोपाधित्वात् सामान्यविशेषयोरिव जातिव्यक्त्योरिव च समष्टिव्यष्ट्यो
स्तादात्म्याभ्युपगमादुपहिततयोस्तैजससूत्रात्मनोरपि तादात्म्यं एतदेव सू
क्ष्मशरीरम् अविद्याकामकर्मसहितं पुर्यष्टकमित्युच्यते ज्ञानेंद्रियपंचकं कर्म

एतस्मात्त्व
तेजसमक
त्वाल्लिंगं ७

ते

पंचीकरणे २   इत्यादिसामान्यं च विशेषादिर्विशेषः सत्तासामान्यं
[illegible] विशेषः [illegible] ३

तं: स: ४

ऽविद्या सत्वकारेण

द्रियपंचकं अंतःकरणचतुष्टयं प्राणादिपंचकं भूतसूक्ष्मपंचकं अविद्या कामः कर्मचेत्येतानि
ष्टौ तत्रैकार्याद्द्रष्टव्या साचतुर्विधा अनित्ये नित्यत्वबुद्धिः अशुचौ शुचित्वबुद्धिः असुखे सुखबुद्धिः
अनात्मन्यात्मबुद्धिश्चेति तदुक्तं अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरवि
द्येति अस्यार्थः अनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिरेकाविद्याद्रष्टव्या अशुचिषु शरी
भार्या रपुत्रादिशरीरेषु शुचित्वबुद्धिरपरा दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिरन्या अना
त्मनि देहे देहेंद्रियादावहमित्यात्मबुद्धिरितरा चेत्यविद्या चतुर्विधेति कामो रागः कर्मत्रि
विधं संचितमागामिप्रारब्धं चेति स्वकृतं फलमदत्वाऽदृष्टरूपेण विद्यमानं संचितं
कर्म यथा संध्यावंदनाग्निहोत्रादि आगामि अस्मिञ्छरीरे क्रियमाणं कर्म वर्तमानशरी
रारंभकं प्रारब्धं कर्म संचितागामिकर्मणोः फलभोगेन वा विरोधिकर्मांतरेण वा ब्रह्मज्ञा
वा नेन वा विनाशः प्रारब्धस्य तु भोगेनैव विनाशः पंचक्लेशाः कार्यकारणरूपेण द्विविधाः अविद्या निरू
पिता मोहकारणस्य सत्वाभावस्याऽस्मिता इदमेवमहं तत्त्वं सामान्याहंकार इति चोच्यते
रागद्वेषौ क्रोधः स्वीकृतस्य पुनस्स्वीकारः ऽसहिष्णुत्वमभिनिवेशः एतेषां पंचानां व
किंबहुना प्रारब्धव्यतिरिक्तानामविद्यादीनां पंचक्लेशानां तत्त्वज्ञानान्नाशः तथाहि अविद्यास्मितारागद्वेषाभिनिवेशाः २

स...अविद्याकारणत्वस्यान्यः कोपतत्पतनं तत्त्वाद्इदमेवमहंतत
मित्युच्यते वेदांतिभिः सामान्याहंकार इत्युच्यते २

तेषां स्थूलमत्त मांसमनः जलं मूत्र लोहित प्राणाः तेजोऽस्थि मज्जा वाक् ४
देवं स्वप्रकाशं मं हंव स्वीतिसाक्षात्कृतवान् १

त्मसाक्षात्कारो निवृत्तिः ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादि श्रुतेः पाशैः पंचक्लेशैरित्यर्थः नि
रुक्तुं तावत्प्रासंगिकं एवं सत्यात्मा योऽनात्मा तन्निरूपिता पंचीकृतभूतानि स्थूलभूतानि पंचीकरणे
कृतानि आकाशादीनां तामसानां भूतानां एकैकं द्विधा विभज्य तत्र एकं चतुर्धा विभज्य स्वांशं प्राप
रित्यज्य इतरेषु योजनं तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणश्रुतेः
पंचीकरणस्याप्युपलक्षणत्वात् पंचीकरणं प्रामाणिकमेव वैशेष्यात्तु तद्वादस्तद्वाद इति
न्यायेन स्वांशभूयस्त्वात् विशेषव्यपदेशोऽपि संभवति एवं च सति आकाशे शब्दोऽभिव्यज्यते स्पर्श
वायौ शब्दस्पर्शौ तेजसि शब्दस्पर्शरूपाणि जले शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरू
परसगंधाश्च तथा पंचीकृतपृथिव्या ब्रह्मांडमुत्पन्नं तदंतर्वर्तिलोकाश्चतुर्दश च
लोकानामनुरूपतरूपे जाते ब्रह्मांडांतर्वर्तिपृथिव्या ओषध्य उत्पन्ना ओषधिभ्योऽन्नं ति
त्रम्पुंसामुक्तोन्नं परिणामरेतः शोणितं तदाकारं स्थूलशरीरमुत्पन्नं तच्चतुर्विधं जरायुज
मंडजस्वेदजमुद्भिज्जं चेति मनुष्यादिशरीरं जरायुजं पक्षिपन्नगादिशरीरमंडजं
यूकादिशरीरं स्वेदजं लतागुल्मादिशरीरमुद्भिज्जं स्थूलशरीरं द्विजं प्रकारं
तदेतच्चतुर्विधं समष्टिव्यष्टिभेदात् पंचीकृतपंचमहाभूतं तत्कार्यं ब्रह्मांडं तद

वे॰ सं॰ ५

तर्वर्तिकार्यं सर्वं समष्टिरित्युच्यते अथवा व्यक्तिषु गोत्वादिवत्सर्वव्यष्टिष्वनुस्यूतं पंचीकृतभूत
कार्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः वनवत्सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते
एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते विविधं राजमानत्वात्सर्वनराभिमानत्वाच्च
प्रत्येकस्थूलशरीरं गवादिव्यक्तिवद्वा वृक्षवद्व्यष्टिरित्युच्यते एतदुपहितं चैतन्यं विश्व इ
त्युच्यते सूक्ष्मशरीरमपहाय स्थूलशरीरं प्रविष्टत्वात् अनयोः समष्टिव्यष्ट्योः
सामान्यविशेषयोरिव तादात्म्याभ्युपगमात् एतदुपहितविश्ववैश्वानरयोरपि तादात्म्यं ए
क एव जीवो जाग्रदवस्थायां स्थूलसूक्ष्मकारणशरीराभिमानी सन् विश्व इत्युच्यते स
एव स्वप्नावस्थायां सूक्ष्मशरीरकारणशरीराभिमानी सन् तैजस इत्युच्यते स एव सुषु
प्तौ कारणशरीराभिमानी सन् प्राज्ञ इत्युच्यते स एव शरीरत्रयाभिमानरहितः सन्शुद्धः
परमात्मा भवति तस्यैवाभिमानिनो जीवस्यावस्थाः पंच जाग्रत्स्वप्नसुषुप्तिमूर्छामर
णभेदात् दिग्वाद्यधिष्ठितदेवतानुगृहीतैरिंद्रियैः शब्दादिविषयानुभवावस्था स्वप्न जाग्रद
वस्था जाग्रत्स्वप्नभयभोगप्रदकर्मोपरमे सति इंद्रियोपरमे जाग्रदनुभवजन्यसंस्कारो
त्थविषयज्ञानावस्था स्वप्नावस्था ति स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञाना

नदू

जाग्रत्स्वप्नभयभोगप्रदकर्मोपरमे स

परमात्मिकात्रुद्धिः कारणात्मनावस्थितिः सुषुप्तिः मुद्गरप्रहारादिजनितविषादेन विशे
षविज्ञानोपरमावस्था मूर्छावस्था तदुक्तं मुग्धेऽर्धसंपत्तिः परिशेषादिति एतच्छरी
रभोगप्रापककर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्यासंपिंडितकरणग्रामावस्था
भाविशरीरप्राप्तिपर्यंतमरणावस्था केचित्तु ग्रस्ता उत्क्रांत्यवस्थास्वेतभावं वदंति अत्र
श्रुतिस्मृतिप्रमाणानि प्रसिद्धानि एकएवपरमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्का
रणमायोपहितः सन्वैश्वानर इत्युच्यते अहमेव वैश्वानरोऽस्मीत्येतदुपासनेन यात
त्प्राप्तिः फलं भवति वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां ऋत्वर्थस्य तथा
तत्त्वप्रतिपादनात् स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन्
त हिरण्यगर्भ इत्युच्यते एतदुपासनया तत्प्राप्तिः फलं भवति अंतरउपपत्तेरित्यस्मि
न्नेवाधिकरणे सूत्रकारभाष्यकाराभ्यामुपकोशलविद्यायां तथैव प्रतिपादनात्
स एव केवलमायोपाधिकः सन्नीश्वर इत्युच्यते तदुपासनया तत्प्राप्तिः फलं भवति
सर्वत्र प्रसिद्धोपदेशादिति शांडिल्यविद्यायां दहर उत्तरेभ्य इति दहरविद्यायां च
सूत्रकारभाष्यकाराभ्यां प्रत्येकोक्तेश्वरोपासनयोः तत्प्राप्तेः प्रतिपादनात् तथाच यथो
पासते तथैव भवतीति श्रुतेश्च भावनामांद्यात् तत्तारतम्येन सार्ष्टि सारूप्यसामीप्यसालो

कृते

हृदयकमला

ते

ते.
सं.
६

काफलानि भवंति सोऽश्नुते साधुमस्तालोकतां जयतीत्यादिश्रुतेः येषु नः साधनचतुष्टयसंपन्ना विचा
राः [illegible] विचारः समर्थाः मंदप्रज्ञास्तेषां गुरुमुखाद्ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तोऽस
च्चिदानंदलक्षणं ब्रह्माहमस्मीति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवन्ना
वस्थायां वा मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारे एतस्मात्सिद्धिः फलं
श्रुतिस्मृतिकोशा न्यात भवति श्रुतिन्यायप्रामाण्यात् ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स एतस्मा
ज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते ओमित्यात्मानं युंजीत ओमित्येवं ध्यायथ
आत्मानमित्यादिश्रुतिभ्यः भगवताप्युक्तं ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्
यः प्रयाति त्यजन्देहं स याति परमां गतिमिति अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपास
ते तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः इति च एवं तत्पदार्थस्य मायोपहितस्य ब्रह्म
णः सृष्टस्य तत्त्वेन जगज्जन्मादिकारणत्वं निरूपितं अयमेवाध्यारोप इत्युच्यते अस्याप
वादः इदानीमुच्यते अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः
यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेणेदं रजतं किंतु शुक्तिरि
त्यभावनिश्चयः अयमेव बाधो विलापनमिति चोच्यते स च बाधस्त्रिविधः शास्त्रीयो

ऽधिष्ठान

यौक्तिकः प्रत्यक्षश्चेति अथात आदेशो नेति नेति नेह नानास्ति किंचन इत्यादिशास्त्राद्ब्र
ह्मव्यतिरेकेण प्रपंचाभावनिश्चयः शास्त्रीयो बाधः मृद्व्यतिरेकेण घटस्याभावनिश्चयव
भत न्निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपंचाभावं निश्चित्य दृश्यमानस्य मिथ्या
त्वनिश्चयेन ब्रह्मात्ममात्रत्वनिश्चयो यौक्तिको बाधः अहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्य
साक्षात्कारेण ज्ञानेन तत्कार्यनिवृत्तिः प्रत्यक्षबाधः यौक्तिकबाधस्यायं क्रमः स्थूलप्रपंचं
सर्वमपि स्थूलभूतेषु विलाप्य तद्व्यतिरेकेण तन्नास्तीति निश्चित्य स्थूलभूतानि समष्टि
व्यष्टि सूक्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य तत्रापि पृथिवीमप्सु विलाप्य अपस्तेजसि
तेजो वायौ वायुमाकाशे आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत् तथा च स्मृतिः ज
गत्प्रतिष्ठा देवर्षे पृथिव्यप्सु विलीयते ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रली
यते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीय
ते इति अन्यं च अकारं पुरुषं विश्वमुकारे प्रविलापयेत् उकारं तैजसं सूक्ष्ममकारे
प्रविलापयेत् मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति आभ्यां मिथ्यारोपा
पवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति तथाहि मायादिसमष्टिस्तदुप
हितमखंडचैतन्यं च तप्तायःपिंडवदेतत्त्रयमविविक्तमेकत्वेनावभासमानं तत्प

त॰
सं

दवाच्यार्थो भवति विविक्तोमखंडं चैतन्यं तत्पदलक्ष्यार्थो भवति अविद्यादिव्यष्टिरेतदुपहितं चैतन्यमेतदाधारऽ
त्वं हितं प्रत्यक्चैतन्यमेतत्त्रयं तप्तायःपिंडवदविविक्तमेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति विवि
क्तं प्रत्यक्चैतन्यं त्वंपदलक्ष्यार्थो भवति एतौ लक्ष्यार्थावुपादाय संबंधत्रयेण सहितं तत्त्वमस्यादिवाक्यं तल्लक्षणयाऽ
खंडार्थबोधकं भवति संबंधत्रयं तु पदयोः सामानाधिकरण्यं सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्ता
नां शब्दानामेकस्मिन्नर्थे वृत्तिः यथा सोयं देवदत्त इत्यत्र तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्का
लविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्देवदत्तपिंडे वृत्तिः सामानाधिकरण्यं पदार्थयोर्विशेषणवि
शेष्यभावः यथा तत्रैव सशब्दार्थ तत्कालविशिष्टायंशब्दार्थैतत्कालविशिष्टयोरन्योन्यभेदव्यावर्तकतया वि
शेषणविशेष्यभावः सोयमयं स इति पदयोरर्थयोर्वाऽविरुद्धदेवदत्तपिंडेन वाक्यार्थेन सह लक्ष्यलक्षण
भावः यथा तत्रैव सोयमित्यादिवाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वाऽविरुद्धदेवदत्तपिंडेन वाक्यार्थेन
सह लक्ष्यलक्षणभावः तथा तत्त्वमस्यादिवाक्ये तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजी
ववाचकयोरखंडचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यं तथा तत्त्वंपदार्थयोरीश्वरजीव
योरन्योन्यभेदव्यावर्तकतया तत्त्वमसि त्वं तदसीति विशेषणविशेष्यभावः तथा तत्त्वंपदयो
स्तदर्थयोर्वा वाक्यार्थेनाविरुद्धाखंडचैतन्येन विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः तदुक्तं
सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनामिति असा
वेकत्वेनैव एतदभिप्रायेण वाक्यवृत्तावप्युक्तं तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने तदैक्यं तत्त्वं

पदार्थैक्यबोधाय प्रवर्त्तते इति तादात्म्यप्रतिपादनेऽखंडस्वरूपप्रतिपादनइत्यर्थः संसर्गस्य वा
विशिष्टस्य वा विशिष्टैक्यस्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वायोगात्
अखंडत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वं सर्वस्य प्रपंचस्य ब्रह्मव्यतिरिक्तस्य कल्पित
त्वेन मिथ्यात्वाद्विजातीयभेदशून्यता जीवपरमात्मनोरत्यंतैक्यात् सजातीयभेदशून्यता एकर
सत्वात्स्वगतभेदशून्यता अथवा त्रिविधपरिच्छेदशून्यत्वमखंडत्वं विभुत्वाद्देशपरिच्छेदशून्यत्वं
नित्यत्वात्कालपरिच्छेदशून्यत्वं सर्वात्मकत्वाद्वस्तुपरिच्छेदशून्यत्वं वेदाहमेतमजरं पुराणं
सर्वात्मानं सर्वगतं विभुत्वादित्यादिश्रुतेः पदस्य पर्यायानेकशब्दप्रकाश्यत्वे सति अविशि
म ष्टत्वमखंडत्वं तदुक्तं अविशिष्टमपर्यायानेकशब्दप्रकाशितं एके वेदांतनिष्णाता अखंडं प्रतिपे
दिरे इति एवं तत्त्वमस्यादिवाक्यजन्याखंडाकारवृत्तिज्ञानादज्ञाननिवृत्तिः सानंदावाप्तिश्च तदुक्तं
प्रत्यक्कुबोधो य आभाति सोद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः इत्थ
मन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि तदर्थस्य च पा
रोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठत इति अन्योन्यतादात्म्य
प्रतिपत्तिः अहं ब्रह्मास्मि ब्रह्मैवाहमस्मीत्यखंडाकारवृत्तिः तया वृत्त्या अज्ञाननिवृत्तेः ब्रह्मत्वप
रोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनोऽखंडानंदस्वरूपावस्थितिर्भवतीति श्लोकतात्पर्यार्थः
इति प्रथमपरिच्छेदः ॥ १ ॥ वृत्तिर्नाम विषयचैतन्याभिव्यंजकोंतःकरणाज्ञानयोः परिणाम

प्रत्यक्षप्रमा तथाहि एकमेव चैतन्यमुपाधिभेदाच्चतुर्विधं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं फलचैतन्यं चेति
तत्रान्तःकरणावच्छिन्नचैतन्यं प्रमातृचैतन्यं अंतःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यं घटाद्यवच्छिन्नं चैतन्यं विष
यचैतन्यं ॥

तं॰ विशेषः भ्रमजनकत्वेनामाऽपरोक्षव्यवहारजनकत्वमावरणनिवर्तकत्वं वा परिणामो नाम उपादानसमसत्ता
त्वो॰ कोऽन्यथाभावः उपादानविषमसत्ताकोऽन्यथाभावो विवर्त इति भेदः अनयोः परिणामविवर्तयो
८ र्वृत्तिरूपापादानान्तःकरणज्ञानापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति न सिद्धान्तविरोधः तन्मनो
ऽकुरुतेत्यादिश्रुत्यान्तःकरणस्य कार्यद्रव्यत्वेन सावयवतया परिणामित्वोपपत्तिः सा च द्विवि
धा प्रमाऽप्रमाभेदात् तत्र बाधेतरानिर्वृत्तिर्बोधो वा प्रमा सा च द्विविधा ईश्वरसाक्ष्या जीवसाक्ष्या चे
ति तत्र ईक्षणाऽपरपर्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिबिंबितचिदीश्वरसाक्ष्या तदैक्षत
अज्ञा॰ तेः बहु स्यां प्रजायेयेत्यादिश्रुतेः अनधिगताबाधितविषयाकारान्तःकरणवृत्तिप्रतिबिंबि
ताचिद्वितीया ब्रह्मात्मैक्यप्रमायास्तथात्वान्नासंभवः एवं च स्वप्ने संसारदशायामबाधित
त्वात् प्रमात्वं नाव्याप्तिः शुक्तिरजतादेर्ज्ञातसत्ताकत्वेनाज्ञातसत्त्वाकत्वाभावान्नातिव्याप्तिः
तत्करणं प्रमाणं साक्षीवाश्रया प्रमा द्विविधा पारमार्थिकी व्यावहारिकी चेति तत्र तत्त्वमस्यादिवा
क्यजन्या प्रमा पारमार्थिकी सा च निरूपयिता अग्रे निरूपयिष्यते प्रपंचप्रमा व्यावहारिकी सा च
षड्विधा प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यभावप्रमाभेदात् तत्र विषयचैतन्याऽभि
न्नप्रमाणचैतन्यं विषयचैतन्यं अंतःकरणवृत्त्यभिव्यक्तचैतन्यं फलचैतन्यं तत्र वृत्ति
विषययोरेकदेशावस्थानेन तदवच्छिन्नचैतन्ययोरभेदो भवति तथाहि तडागोद
कं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य [illegible] करणमप्यावरणं परिणमते तथैव द्विया

अन्तरंगो च मति द्विविधा विशिष्टात्मविषया शुद्धविषया चेति ... ॥ ८

र्थसन्निकर्षानंतरमंतःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्यते पश्चात्तदाकारेण प
रिणमते सोयं परिणामो वृत्तिः तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति तदा वृत्तिविषययोरेक
पदेकदेशस्थत्वेन तदुपहितभेदाप्रयोजकत्वात्प्रमाणचैतन्यं विषयचैतन्याभिन्नं भवति
सेयं प्रत्यक्षप्रमा तत्र वृत्त्यावरणं निवर्तते चैतन्यनाज्ञानं प्रमया सावरणमज्ञानं निवर्तते
ततो विषयः स्फुरति सा त्रिगुणान्तःकरणोपहितचैतन्यं साक्षी सेयं प्रत्यक्षप्रमा द्विविधा विशिष्ट
मविषया [illegible] चेति वाह्यप्रमा आंतरप्रमा चेति तत्र वाह्यप्रमा श्रोत्रादि [illegible] स्पर्शरू
पससगंधविषयभेदात्पंचविधा तत्करणानि श्रोत्रादीनि ज्ञानेंद्रियाणि पंच आंतर
प्रमा द्विविधा आत्मगोचरा सुखादिगोचरा चेति अहं ब्रह्मास्मीति शुद्धात्मविषया म
यि सुखमित्यादि सुखादिविषया अंतरिंद्रियं मन आंतरप्रमाकरणमिति वाचस्प
तिमिश्राः आचार्यास्तु एवं वर्णयंति इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इंद्रियाणि
पराण्याहुरिंद्रियेभ्यः परं मन इति श्रुतिस्मृतिभ्यां मनस इंद्रियेभ्यः पृथक्कारणान्मनो
नेंद्रियं वृत्तिप्रत्युपादानत्वान्नेकरणं मनः सुखादिसाक्षात्कारस्य प्रमाणजन्यत्वेनाप्र
मात्वमिष्टमेव अत एवांतःकरणतद्धर्माणां शुक्तिरजतादिवत्प्रातीतिकत्वं शुद्धात्मसा
क्षात्कारस्य वेदांतवाक्यजन्यत्वात्प्रमात्वं वाक्यस्य परोक्षज्ञानजनकत्वं व्यपदिश्यते लिं
ङ्गेन ज्ञानं अनुमानमिति व्याप्यव्यापकयोर्लिंगसाधनसाध्ययोर्नियतसामानाधिकरण्यं व्याप्तिः
ननु मनो [illegible] नेंद्रिय [illegible] मनः [illegible] इति [illegible] शतवत्
[illegible]

न

तेः प्रतिबंधकाभावेसतिसहचारदर्शनेनसागृह्यते तस्यांगृहीतायांलिंगज्ञानेनव्याप्त्यनुभवजन्यसंस्कारो
त्वाः द्बोधेसतिअनुमितिर्जायते इयंस्वार्थानुमितिः परार्थानुमितिस्तुन्यायसाध्या न्यायोऽवयवसमुदायः
६ अवयवाश्चत्रिविधाः प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपावा तथाहि जीवःप
रस्मान्नभिद्यतेसच्चिदानंदलक्षणत्वात्परमात्मवदिति अत्रजीवः परस्मान्नभिद्यत इति प्रतिज्ञास
च्चिदानंदलक्षणत्वंहेतुः इदमेवलिंगमित्युच्यते यःसच्चिदानंदलक्षणः सपरस्मान्नाभिद्यतेय
जानामि थापरमात्मेत्युदाहरणं अहमस्मिअनुभवामीतिकदाप्यप्रियोनभवामीत्यनुभवात्जीवस्यस २
च्चिदानंदलक्षणत्वंअतोनहेत्वसिद्धिः सत्यंज्ञानमनंतंब्रह्म आनंदोब्रह्मेतिव्यजानात् इत्यादि
श्रुत्याब्रह्मणःसच्चिदानंदलक्षणत्वं अतोनदृष्टांतासिद्धिः एवंगुरुमुखाच्छ्रुतवेदांतस्यकोऽपि
ते तस्यैववदार्थस्यस्वस्मिन्सच्चिदानंदलक्षणदर्शनादहंब्रह्मेतिब्रह्माभिन्नानुमितिरुत्प
नि द्यते नचोपनिषदस्यैकस्यानुमानगम्यत्वानुपपत्तिः मंतव्य इतिमननव्याख्याना
त् वेदांतेसहकारित्वेनानुमानप्रमाणस्वीकारात् परार्थानुमितिस्तुन्यायावयवदेशेनोत्प
द्यतेन्यायोदर्शितः एवंब्रह्मव्यतिरिक्तस्यप्रपंचस्यमिथ्यात्वसाध्योऽनुमितिर्दृश्यत्वादिहेतु
भिरुत्पद्यते मिथ्यात्वंनामानिर्वचनीयत्वं दृश्यत्वंनामचेतनविषयत्वं अतोनब्रह्मणिव्यभिचा
रः तेनानुमानमन्वयरूपमेकमेवकेवलान्वयी अस्मिन्मतेब्रह्मव्यतिरिक्तस्यसर्वस्यब्रह्मणिनि
ष्ठात्यंताभावप्रतियोगित्वेनं दप्रतियोगित्वरूप[illegible]केवलान्वयित्वस्याप्रसिद्धेः नापिव्यतिरेकि

नन

ज्ञानं व्याघो

साधकेन साध्यानुमितौ साध्याभाववत्साधनाभावव्याप्तिज्ञानस्यानुपयोगात् अन्वयव्याप्तिम
विदुषः साध्यप्रमाया एव तत्त्वप्रमाणत्वादिति विद्यते साहचर्यप्रमितिरूपमितिः वाक्यकारणिकाप्रमा शाब्दी
आकांक्षा योग्यता सन्निधिश्च पदसमूहो वाक्यं अन्वयानुपपत्तिराकांक्षा वाक्यार्थाबाधो योग्यता अविलंबे
नोच्चारितत्वं सन्निधिः अकांक्षत्वे संगत्यग्रहाभावान्न वाक्यप्रमा पदपदार्थयोः स्मार्यस्मारक
भावः संगतिः सा द्विविधा शक्तिर्लक्षणा चेति शक्तिर्नाम मुख्यावृत्तिः पदपदार्थयोर्वाच्यवाचक
भावसंबंध इति यावत् सा च द्विविधा योगो रूढिश्चेति अवयवशक्तिर्योगः यथा पाच
कादिपदानां रूढिः समुदायशक्तिः यथा घटादिपदानां सा च वृद्धव्यवहारादिना गृह्यते त
थाहि उत्तमवृद्धस्य घटमानयेति वाक्यश्रवणानन्तरं मध्यमवृद्धः प्रवर्तते बालः प्रवृत्तिहे
तुज्ञानमनुमिनोति तथाहि इयं प्रवृत्तिर्ज्ञानजन्या प्रवृत्तित्वात् मदीयप्रवृत्तिवत्
इति ज्ञानमनुमाय तस्य वाक्यजन्यत्वमनुमिनोति इदं ज्ञानमुद्दवाक्यजन्यमेतद्वाक्या
न्वयव्यतिरेकानुविधायित्वात् दंडजन्यघटादिवदित्यनंतरमावापोद्वापाभ्यां घटपद
स्य च घटत्वे शक्तिमवधारयति साच शक्तिः पदार्थ इति नैयायिकाः कार्यान्विते इ
ति मीमांसकाः अन्वित इति वेदान्तिनः एवं व्याकरणादिनापि शक्तिर्गृह्यते उक्तं च शक्ति
ग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्नि
ध्यतः सिद्धपदस्य वृद्धा इति लक्षणा शक्यसंबंधः सा च द्विविधा केवललक्षणा लक्षितलक्ष

सो त्वा

हेतु तथा ज्ञानस्य

उत्तमवृ[illegible]घटमानयेति इयं प्रवृत्तिर्ज्ञान
साध्याभाव[illegible]त्वादिति च ताभ्यां मावापो द[illegible]
पाभ्यां ॥१॥५

लक्षणा

क

नदाध्यपग्रहिण

यथा प्रोणोणश्चावतिष्ठन्नस्रोणश्छंस्य
लाम्लगुणतिरिक्तं एवाविधा

नं णा चेति केवललक्षणा त्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति शक्यार्थपरि
तो त्यागेन तत्संबंध्यर्थांतरे वृत्तिर्जहल्लक्षणा यथा गंगायां घोषः प्रतिवसतीति अत्र गंगापदस्य
१० तीरे ॥ शक्यार्थापरित्यागेन तत्संबंध्यर्थांतरे वृत्तिरजहल्लक्षणा यथा मंचाः क्रोशंतीति
अत्र मंचस्थेषु पुरुषेषु ॥ शक्यैकदेशपरित्यागेन एकदेशे वृत्तिर्जहदजहल्लक्षणा इ
यमेव भागलक्षणेत्युच्यते यथा सोयं देवदत्त इत्यत्र सोयमिति पदयोः केवलदेवदत्त
पिंडे यथा वा तत्त्वमसीत्यत्र तत्त्वंपदयोरखंडचैतन्ये शक्यपरंपरासंबंधो लक्षितलक्ष
णा यथा द्विरेफपदस्य भ्रमरे गौणप्रवृत्तिर्लक्षितलक्षणैव एवं च शक्तस्य लक्ष्यस्य गृहीतसंगति
कवाक्याद्वाक्यार्थप्रमोत्पत्तौ आकांक्षा योग्यता आसत्तिस्तात्पर्यज्ञानं चेति चत्वारि कार
स्मृतिः णानि आकांक्षा योग्यता निरूपिते शक्तिलक्षणान्यतरसंबंधेनाव्यवधानेन पदज
न्यपदार्थोपस्थितिरासत्तिः तात्पर्यं द्विविधं वक्तृतात्पर्यं शब्दतात्पर्यं चेति तत्र वक्तुरभिप्रा
यो वक्तृतात्पर्यं तज्ज्ञानं वाक्यार्थज्ञाने न कारणं तदभावेप्यश्रुतवक्तृकाद्वाक्याद्वाक्यार्थज्ञानदर्शनात् त
दितरप्रतीतिमात्रेच्छयाऽनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यं तच्च षड्विधैर्लिंगै
र्निर्णीयते वेदे लिंगानि तु दर्शितानि उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अर्थवादोपपत्ती
च लिंगं तात्पर्यनिर्णये इति अस्यार्थः प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन आद्यंतयोः प्रतिपा
दनमुपक्रमोपसंहारौ यथा छांदोग्ये सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म एत

प्रपाठके

मानान्तराप्तिफलं प्रकरणप्रतिपाद्यस्य ४

प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपा[illegible] तत्त्वमसी
ति नवकृत्वोऽभ्यासः १

श्रुति

तं त्वौपनिषदं पुरुषं पृच्छामीत्यादि २

ऽऽत्म्यमिदं सर्वमित्युपक्रमोपसंहारावाद्यंतयोः प्रकरणप्रतिपाद्यस्य मानान्तराऽविषयता। पूर्वता
यथा तत्रैवाद्वितीयवस्तुनो मानान्तराऽविषयता प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानस्य प्रयोज
नं फलं यथा तत्रैवाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इत्यद्वि
तीयवस्तुप्रशंसनं प्रकरणप्रतिपाद्यस्य दृष्टांतैः प्रतिपादनमुपपत्तिः यथा तत्रैव यथा सोम्यैके
न मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्य
प्रतिपादितमृदादिदृष्टांतैरद्वितीयवस्तुप्रतिपादनं एवंविधषड्विधतात्पर्यलिंगैर्वेदांतानामद्वितीयव
स्तुनि तात्पर्यनिश्चयः। इदमेव श्रवणमित्युच्यते श्रुतस्यार्थस्योपपत्तिभिश्चिंतनं मननं विजा
तीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनं तदुक्तं शब्दशक्तिवि
षयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः। वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्य
ते चेतसस्तु चितिमात्रगोचरता ध्यानमित्यभिवदंति वैदिकाः अंतरंगमिदमित्थमीरितं तत्फल
स्वपरमात्मभूरुदयन इति इदं श्रवणादित्रयसाधनसंपन्नस्य संन्यासिनो ज्ञानं प्रत्यंतरंगसा
धनं आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेः साधनानि नित्यानित्य
वस्तुविवेक इहामुत्रार्थफलभोगविरागः शमदमादिषट्कं मुमुक्षुत्वं चेत्येवरूपाणि परीक्ष्य
लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवा।

मर्थवादः यथा तत्रैव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमादेशमप्राक्ष्य इत्यद्वि
तीयवस्तु ११

तै॰
वा॰
११

भिगोकेत्तीमित्यादिः श्रोत्रियं ब्रह्मनिष्ठं कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् शांतो दांत
उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीत्यादिश्रुतिभ्यो यथोक्तसाधनसंपन्नस्य संन्या
साधिकारः विहितानां कर्मणां विधिनापरित्यागः संन्यासः स च वैराग्यहेतुकः यदहरेव विरजेत्तदहरे
व प्रव्रजेदित्यादिश्रुतेः वैराग्यं परमेतस्य मोक्षस्य परमो वधिरिति स्मृतेश्च सं वैराग्यतारतम्येन
चतुर्विधः कुटीचरबहूदकहंसपरमहंसभेदात् वैराग्यं द्विविधं अपरं परं चेति तत्रापरं चतुर्विधं
यतमानव्यतिरेकैकेन्द्रियवशीकारभेदात् अस्मिन्संसारे इदं सारमिदमसारमिति सारासा
रविवेको यतमानवैराग्यं चित्तगतदोषाणां मध्ये एतावंतः पक्वा एतावंतोऽपक्वा इति विविच्या
पक्वदोषनिरोधयत्नो व्यतिरेकवैराग्यं विषयेष्वासक्तिं विमनसि द्विधानिरोधावस्थानमेकेंद्रि
यत्ववैराग्यं वशीकारवैराग्यमैहिकामुष्मिकविषयजिहासा तदुक्तं दृष्टानुश्रविकविष
यवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति त्रिविधं मंदतीव्रतीव्रतरं चेति पुत्रदारादिवियोगे
धिक्संसारमिति बुद्ध्या विषयजिहासा मंदवैराग्यं अस्मिन्नेव जन्मनि पुत्रदारादिमास्त्विति स्थि
रबुद्ध्या विषयजिहासा तीव्रं पुनरावृत्तिसहितब्रह्मलोकादिपर्यंतं मास्त्विति स्थिरबुद्ध्या विष
यजिहासा तीव्रतरं तत्र मंदवैराग्ये संन्यासाधिकार एव नास्ति यदा मनसि वैराग्यं जायते सर्वव
स्तु तदैव संन्यसेद्विद्वानन्यथा पतितो भवेदिति स्मरणात् तीव्रवैराग्ये सति यात्राद्यश
क्तौ कुटीचकाधिकारः तच्छक्तौ बहूदकसंन्यासाधिकारः तीव्रतरवैराग्ये सति हंससंन्यासाधि

कारः एते चैवः संन्यासास्तेष्वासाचारः स्मृतौ प्रसिद्धाः तीव्रतीव्रतरवैराग्यमुमुक्षोः परमहंससंन्यासाधि
स च परमहंसो द्विविधः विविदिषासंन्यासो विद्वत्संन्यासश्चेति साधनसंपन्नेनात्मतत्त्वज्ञानमुद्दिश्य क्रियमाणः
संन्यासो विविदिषासंन्यासः एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिश्रुतिस्तत्र प्रमाणं स च
द्विविधः जन्मापादककर्मत्यागात्मकः प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्चेति न कर्म
णा न प्रजया धनेन त्यागेनैके ऽमृतत्वमानशुरित्यादिश्रुतिर्यथाक्रमं विरक्तस्य गृहस्थादेः प्रव
लत्रैमित्येव क्षेन संन्यासप्रतिबंधेष्वाद्यसंन्यासेऽधिकारः [illegible] अधिकारः जनक
एनामेव यीप्रमतीनां तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषु प्रलंभान्न [illegible] दण्डमा
त्रपदनेकोद्गीं नपरिग्रहे [illegible] विसर्जेत् संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजन्त्यक
तोद्वाहाः परं वैराग्यमाश्रिताः इत्यादिवचनानि प्रमाणानि [illegible] श्रवना
दिश्रुतात्यन्तं वृहत्सामाज्ञात्कौषीतकजहस्थादिनाचितविश्रातिल [illegible] वन्यक्रिमाद
स्य क्रियमाणः संन्यासो विद्वत्संन्यासः तत्रापि तमेव विविदित्वा [illegible] श्रवयोगिनो
परमहंसानामित्यादि परमहंसोपनिषत् यदा तु विदितं [illegible] नातं ते तदे
कदंडसंगृह्य सोपवीतां शिखां त्यजेदित्यादिश्रुतिस्मृति [illegible] त्राद्या संन्या
सो जन्मान्तरीयमिश्राने उपकरोति जनकादीनां वक्ष्ये [illegible] त्यादिषु पश्चा
तु गृहस्थान न सायाद्यो संन्यसेदित्यानुरसंन्या [illegible] वधान [illegible] नुरे यथ विविदत्संन्य
धिकारान्न संन्यासान्तरे जन्मनाश्रयकरणाविरोधः [illegible] त [illegible] जन्मान्तरेषु यदि सा

वे॰सा॰ तस्मात्तस्मात्सीत् संन्यासपूर्वकमिदं श्रवणादिकं च विधामवाप्नुतिनः सर्वत्रापि यव्रततत्रास्माभिरुक्तमस्ति
त्वेनिवारयाम इति तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वसाक्षात्कारसाधनत्वमन्वयव्यतिरे
काभ्यां निश्चीयते अथ हिंसाद्याततायिनः इत्यादि तत्त्वमस्यादिवाक्य इति वाचस्पतिमिश्राः आचार्यास्त्वेवं वर्ण
१२ यंति यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्ये दर्शनमुद्दिश्य मनननिदिध्यासनो
पकारकं नोपकार्यमङ्गाभ्यां श्रवणं नामाङ्गी विधीयते तस्य च द्रष्टव्यफलत्वान्नापूर्वविधिः अ
प्राप्तार्थविधायकोऽपूर्वविधिः किं तु नियमविधिर्वा परिसंख्याविधिर्वा पक्षप्राप्तस्या
प्राप्तांशपूरको विधिर्नियमविधिः यथा व्रीहीनवहन्यादित्यवघातविधिः उभयप्राप्तावितर
व्यावर्तको विधिः परिसंख्याविधिः यथा इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानी
मादत्त इति गर्दभरशनाग्रहणव्यावृत्तिविधिः एवं प्रकृतेऽपि जिज्ञासुर्वेदान्तश्रवणमेव कु
ति र्यादिति नियमविधिः वेदान्तश्रवणव्यतिरिक्तं न कुर्यादिति परिसंख्याविधिर्वा तदुक्तं निय
मः परिसंख्या वा विध्यर्थो हि भवेद्यतः अनात्मादर्शनेनैव परमात्मानमुपास्महे इति
न च श्रवणसंन्यासिनां नित्यं नित्यकर्म परित्यज्य वेदान्तश्रवणं विना वर्तमानस्य सं
न्यासी पतत्येव न संप्राप इति अकरणे प्रत्यवायश्रवणात् सांस्त्रिन्यायतः कृते न चे
हेदान्तविंतयति स्म ... यावज्जीवमग्निहोत्रं जुहुयादित्यादि श्रुत्या जीवननिमित्तीक
त्याग्निहोत्रादिविधानवज्जीवननिमित्तीकृत्य श्रवणादिविधानात् तथा च दार्थकादि
वेकाय संन्यासः सर्वकर्मणां श्रुत्याभिधीयते यस्मात्तस्माज्ज्ञाय पतितो भवेत् कार्यस्य सं

कारणेन तत्क्षणादेव निरवपतितो यथा भवेत् यतः कस्यचिदर्जनादसौ सद्य एव पतितो न सं
शय इति वार्त्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यां श्रवणादिरहितस्य संन्यासिनः पाति
त्याभिधानाच्च गृहस्थादीनां श्रवणादिकं काम्यं दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशु
श्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् अन्ये तु वेदान्तश्रवणे साधनचतुष्टयसंपन्नस्यैवाधिकारो गृ
हस्थादेः श्रवणाधिकार एव नास्ति श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानप्रतिपादकोपा
ख्यानस्य तु लाभमिति तात्पर्यात्स्वार्थे तात्पर्यमेव नास्तीत्याहुः तदसत् याज्ञवल्क्यप्रभृतीनां गृह
स्थस्य तु ज्ञानाधिकारस्य च संन्यासित्वस्मरणात् परवैराग्यपूर्णेन तु स्य गृहेषु जितात्मसेति यावत् त
द्दलै तेनापि गुरूपसत्त्यादेर्गुणे वैतस्यमिति तच्चाश्रुतसमाधेरन्तरंगसाधनं अतएव तीव्रसं
वेगानामासन्नः समाधिलाभ इति श्रुतिमतिप्रसंगेन एवं कर्मवाक्यानामप्युपक्रमादिभि
स्तात्पर्यनिर्णयः प्रकरणाच्छिद्रौ किक वाक्यानां तात्पर्यनिर्णयः एतादृशतात्पर्यानुपपत्तिः
पूर्वोक्तलक्षणाबीजं नेत्यस्यानुपपत्तिस्तस्याश्च दृष्टीः प्रवेशपद्या वाबसंभवात् सगुणो
पास्त्यादौ तात्पर्यानुपपत्तेः संभवात् न केवलं लक्षणावदमात्रे वृत्तिः किं तु वाक्येऽपि रप्रि
गंभीरपाणिनवानां घोषादिस्थानेपदसमुदायस्य कास्यतीरलक्षणास्वीकारात् अतएव

वे.सा.
१३

र्थवादाभ्यां वाक्यानां प्रामाण्यमेतन्नणे अन्यपादं तत्रैव पर्य्यस्यात् गत एव प्राधान्यपदार्थप्र
त्यापकत्वेनार्थवाक्यं दवाक्यानां पदस्थानीयतया पदैकवाक्यत्वं स्वार्थे तात्पर्यवतां सन्निधौय
त्तिदर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां प्रयक्तारकांक्षायां एकवाक्यत्वं
वाक्यैकवाक्यत्वं एवं चावान्तरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणं तथा न्वयव्य
तिरेकानुविधानात् एवं च योक्तसहकारिसंपन्नवाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमाम्
त्पादयति तत्र परोक्षार्थप्रतिपादकवाक्यं परोक्षप्रमोत्पादकं यथा स्वर्गकामो यजेत सदेव सो
म्येदमग्र आसीत् दशमोऽस्तीत्यादिवाक्यं परोक्षत्वं नाम अनावृत्तिसंविता दात्म्याभावो यो
ग्यस्य विषयस्य धर्माधर्मयोरयोग्यत्वान्न प्रत्यक्षत्वं अपरोक्षार्थप्रतिपादकं वाक्यमपरो
क्षप्रमोत्पादकं यथा दशमस्त्वमसि तत्त्वमसीत्यादिवाक्यं अपरोक्षत्वं नाम अनावृत्तिसंविता
दात्म्यमनावृत्तसंवत्साक्षि चैतन्यं अन्तःकरणोपहितं चैतन्यं साक्षी तस्यावृतत्वे जगदान्ध्य
प्रसंगः तत्तादात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वं तथा च दशमस्त्वमसीत्यत्र दश
मस्त्वं पदार्थाभिन्नतयाऽपरोक्षत्वेन वाक्यादपरोक्षप्रमैव जायते दशमोऽस्मीति ननु
वाक्यात्परोक्षज्ञानं मनसा तत्साक्षात्कारः मनसैवानुद्रष्टव्यमित्यादिश्रुतेः वृत्तिप्रत्यक्षादिनेव न क
रणत्वायोगाच्च प्रमाणजन्यापरोक्षज्ञानस्यैव मननिवर्तकत्वाच्च एवं तत्त्वमसीत्यत्रापि तत्पदल

तस्य ब्राह्मणत्वं परलत्वरसाद्यदूमि न्नतयाऽनावृतसंविलावान्म्यानित्याऽपरोक्षतत्वेन मेधोध्यित
त्वंपदार्थस्याधिकारित्वे श्रवणमनननिदिध्यासनसंस्कृतं तत्तच्छ्रवणसहकृततद्विचारितं तत्त्वमस्यादिवाक्याद
हं ब्रह्मास्मीत्यपरोक्षज्ञानमाप्नोयते एवं च श्रुतिः सर्वे वेदा यत्पदमामनंति तंत्वौपनिषदं पुरुषं पृच्छामि
नावेदविन्मनुते तं बृहन्तं मिथ्यादिश्रुतयः सामर्थ्येनोत्पद्यते मनसैवानुद्रष्टव्यमित्यादिश्रु
त्यमनसो वाचां सहकारित्वप्रतिपादनपराः अन्यथा यन्मनसा न मनुते इत्यादिश्रुतिविरो
धप्रसंगात् एवं श्रुतार्थप्रमाणनिरूपितानुपपद्यमानार्थदर्शनादुपपादकभूतार्थान्तर
कल्पनमर्थापत्तिप्रमा यथा दिवाभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विनाऽनुपपद्यमान
पीनत्वदर्शनादुपपादकरात्रिभोजनकल्पकं तेनानुपपद्यमानपीनत्वकरणं रात्रिभो
जनं पीनत्वं फलं सा चार्थापत्तिर्द्विधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति दृष्टार्थापत्ति
र्यथा शुक्तौ विषये रजतमिति नेदं रूप्यमानस्य नेदं रजतमिति बाधस्यत्वदृष्टे तस्य मिथ्यात्व
मंतरेणानुपपत्त्या ... सन्मिथ्यात्वं कल्पयति नचेदं रजतमिति ज्ञानद्वयं पूर्वेवाति
निवृत्त्यभावप्रसंगात् रजतस्यासत्वे तद्ज्ञानस्य प्रत्यक्षत्वाऽभावप्रसंगात् सत्वे बाधा
भावप्रसंगात् देशान्तरस्थितरजते ... सन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसंगात् सद्
तेसाक्षात्कारो मिथ्यात्वेनुभवस्य सर्वानुभवसिद्धत्वात् तस्माद्रूपकार्यमपि ...

तं० प०
१५

रूप्यतत्संसर्गसंसर्गीकर्तव्यं रजतोत्पादके लौकिकसामग्र्यभावे विशेषावर्त्तेन्द्रियसन्निकर्षानंतरमिमं
इदमाकारवृत्तौ सत्यामिदमवच्छिन्नचैतन्यनिष्ठशक्तित्वप्रकारिकाऽविद्या सादृश्यदर्शनसमुद्बुद्ध
संस्कारसहकृता रजताकारेण तज्ज्ञानाकारेण च परिणमते तस्य च मायाकार्यत्वान्मिथ्यात्वम् एवं
च्छायापत्तिर्निरूपिता श्रुतार्थापत्तिर्यथा तरति शोकमात्मविदिति शोकापनदितसमानत्वादि
तिशोकोपनदितसमानत्वादिविधस्य ज्ञाननिवर्त्यत्वं श्रुतं तस्य मिथ्यात्वमंतरेणासत्यत्वेनानु
पपन्नेत्यमिथ्यात्वं कल्पयतीति सेयं श्रुतार्थापत्तिः एतेन करणविशिष्टचैतन्यसमानताकृती
[illegible] केवलस्यात्मनो संगत्वेन समानत्वाद्यनुपपत्तेः शुक्तिरजतवदात्माऽज्ञानादेः करणं)
[illegible] स्वरूपेण [illegible] अध्यासो नाम परत्र परावभासः स च द्विविधः ज्ञानाध्यासो
ऽर्थाध्यासश्च तत्रातस्मिंस्तद्बुद्धिर्ज्ञानाध्यासः यथा शुक्तौ रजतबुद्धिः यथा वात्मन्यात्मबुद्धिः
प्रमाणजन्यज्ञानविषयः पूर्वदृष्टसजातीयोऽर्थाध्यासः सोऽपि द्विविधः प्रातीतिको व्यावहा
रिकश्चेति तत्रागंतुकदोषजन्यः प्रातीतिकः यथा शुक्तिरजतादिः प्रातीतिकभिन्नो व्याव
हारिकः यथाकाशादिप्रपंचजगत् तथा च समानत्वादिविधस्याध्यस्तत्वान्मिथ्यात्वमुप
पद्यते एतदभिप्रायेणोक्तं भगवता भाष्यकारेण स्मृतिरूपः परत्र पूर्वदृष्टावभासः पूर्वदृष्ट
वभासः सजातीयावभास इति [illegible] स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः पूर्वदृष्ट
स्यावभासः पूर्वदृष्टसजातीयस्येति [illegible] सपदोनुमानेनान्यत्रा

नविषयः पूर्वहस्तसजातीयावभास इति एवं प्रसक्तार्थापत्तिर्निरूपिता भावप्रमायोग्यानुपलब्धि
करणिका यथा घटानुपलब्ध्या घटाभावप्रमा भूतले जायते तत्रानुपलब्धिरेव करणं नेन्द्रियं
तस्याधिकरणग्रहणे उपक्षीणत्वात् अभावेन सह सन्निकर्षाभावाच्च असाधारणकारणं करणं
तद्द्विविधं उपादानकारणं निमित्तकारणं चेति कार्यान्वितकारणमुपादानं यथा घटादेर्मृदा
दिः कार्यानुकूलव्यापारवन्निमित्तं यथा घटादेः कुलालादिः ब्रह्म समवायोपहितं सत्प्रपं
चस्योपादानं प्राधान्येनोपादानं स्वप्राधान्येन निमित्तं च भवतीत्येदृशं तत्त्वकृत्स्नप्रसक्तिरेवेत्यादि
श्रुतेः प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्राच्च तच्च कारणं द्विविधं साधारणमसा
धारणं चेति कार्यमात्रोत्पादकं साधारणकारणं यथा अदृष्टादिः कार्यविशेषोत्पादकमसा
साधारणकारणं यथा चाक्षुषादिप्रमायां चक्षुरादिः तथा घटादिप्रमाभावप्रमायां घटाद्यनु
पलब्धिरसाधारणं कारणं तदेव करणं यद्यत्र घटः स्यात्तर्हि तर्कितेन प्रतियोगिसत्त्वेन
तदुपलम्भापत्तिप्रसञ्जिता अनुपलब्धिरूपा प्रतियोगिग्रहयोग्यानुपलब्धिः तथा अभा
वो गृह्यते नञर्थोल्लिखितधीविषयोऽभावः सोऽन्योन्याभावः एक एव भेदप्रमाणाभावात् न
चाहिं सदेव सोम्येदमग्र आसीत् सत्त्वाच्चापरस्येति श्रुतिसमयोऽभावोऽप्युत्पद्यते कार्यस्य
कारणात्मना सत्त्वप्रसक्तेः पदजनेन प्रागभाव इत्युदितनिरक्षेपणात् प्रागात्मकेऽन्योन्याभावे स्य

तं॰
सं॰
२५

निरन्वयनाशानङ्गीकारे रूपध्वंसस्यापि दुर्निरूपत्वात् अनादिनित्यत्वे त्रैकालिकात्यन्ताभावान्योन्या
भावसाधारणे हेतुः इति विशेषोपपत्तेः अत्यन्ताभाव एक एव स च द्विविधः पारमार्थिको व्यावहारिकश्चेति ने
ह नानास्ति किञ्चनेत्यादि श्रुतिप्रतिपादितप्रपञ्चात्यन्ताभावः पारमार्थिकः सा चाधिष्ठानस्वरूपः
अधिष्ठानातिरिक्त इति केचित् घटात्यन्ताभावो व्यावहारिकः प्रथमे वाऽभेदप्रतियोगिकोऽभू
तले घटो नेत्यादि प्रतीतिविषयो भेदस्तु यत्र घटो नास्तीत्यादिविषयोऽत्यन्ताभावः इत्युच्य
ते वादिभिः सर्वोऽप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात् अन्ये तु लौकिकतन्त्रान्तरवद्विम
तसरतोऽभावभेदं स्वीचक्रुः तथाहि प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदाच्च
तुर्विधोऽभावः उत्पत्तेः प्राक् कारणे कार्याभावः प्रागभावः यथा मृदादौ घटाद्यभावः उत्पन्नस्य
कार्यस्य कारणेऽभावो ध्वंसः यथा मुद्गराद्यभिहननानन्तरं कपालादौ घटाद्यभावः प्रतियो
गिसमानाधिकरण्याभावोऽत्यन्ताभावो यथा भूतलादौ घटाद्यभावः प्रतियोगिसमानाधिक
रणाभावोऽन्योन्याभावः यथा भूतलादौ घटभेदः सर्वेऽप्यभावाऽनित्या एवेति एवमभावप्रमा
निरूपिता एवं षड्विधप्रमया यासा बाधितज्ञानेन निवर्तते तत्र परोक्षप्रमयाऽसत्वापादकमौढ्या
ज्ञाननिवृत्तिः अपरोक्षप्रमयाऽभानापादकाज्ञाननिवृत्तिः प्रमाभिन्नं ज्ञानमप्रमा सा च द्विविधा

स्मृतिरनुभूतिश्चेति संस्कारमात्रजन्यं ज्ञानं स्मृतिः सापि द्विविधा यथार्थायथार्थभेदात् यथार्था
स्मृतिरपि द्विविधा अनात्मस्मृतिरात्मस्मृतिश्चेति तत्र व्यावहारिकप्रपंचो मिथ्या इत्युपपत्त्या ग्रोऽडत्वात
त्रिच्छिन्नत्वा शुक्तिरूप्यवदित्यनेन मानसिद्धमिथ्यात्वानुसंधानं यथार्थोऽनात्मस्मरणं तत्त्वमस्यादि
वाक्यार्थानुसंधानं यथार्थात्मस्मरणं अयथार्थास्मृतिरपि द्विविधा पूर्ववत्सर्वं च सत्यत्वानुसं
धानमयथार्थोऽनात्मस्मरणं मिथ्यावस्तुत्वात्मनस्यापि अहंकारादिधर्मत्वानुसंधानमात्मनि कर्तृत्वानु
संधानं वाऽयथार्थात्मस्मरणं तत्र सर्वत्रानुभव एव न स्मृतिरिति वक्ष्यते स्मृतिभिन्नं ज्ञानमनुभूतिः सच
द्विविधा यथार्थाऽयथार्था चेति यथार्थानुभूतिः प्रमा सा निरूपिता बाधितविषयानुभूतिरयथार्था
सापि द्विविधा संशयो निश्चयश्चेति एकस्मिन्धर्मिणि भासमानविरुद्धनानाकोटिकं ज्ञानं संश
यः एकस्मिन्धर्मिणि स्वाधिकारविरुद्धद्वयवैशिष्ट्यावगाहि सोऽन्योन्यविरुद्धज्ञानं संशयः स च द्विविधः
प्रमाणसंशयः प्रमेयसंशयश्च तत्र प्रमाणगतासंभावना प्रमाणसंशयः यथाऽत्र न अभ्यासदशायां मनोऽप्य
नेन ज्ञानं प्रमाणं न वेति संशयः सच प्रमाण्यनिश्चयान्निवर्तते प्रमाण्यनिश्चयस्तु स्वत एव प्रमा
ण्यं नाम तद्वति तत्प्रकारकत्वं तस्य स्वतस्त्वं नाम यावत्स्वाश्रयग्राहकग्राह्यत्वं स्वाश्रयो व्यवसायो वृत्तिज्ञानं तद्ग्रा
हकं साक्षिचैतन्यं तेन तन्निश्चयः प्रामाण्यस्य गृह्यते इति स्वतःप्रामाण्यं अप्रमाण्यं परतो गृह्यते तत्र

तं॰ सं॰
१६

तदभाववति तत्प्रकारकत्वं तदभाववत्वस्य शुक्ति ज्ञानानुपनीतत्वेन साक्षिणागृहीतुमशक्यत्वात् यथार्थत्व एवा
प्रामाण्यग्रहइति प्रामाण्यस्य स्वतस्त्वपक्षे संशयो दोषवदुपपद्यते इत्यपि प्रमाणसंशयः वेदांतानां द्वितीये ब्र
ह्मणि प्रमाणं न वेति संशयः करणगतासंभावना सा च श्रवणेन निवर्तते तत्त्वनिरूपितं तदपि श्रवणे
शारीरकप्रथमाध्यायपठनेन निष्पद्यते प्रमेयगतासंभावना द्विविधा अनात्मगता आत्मगता चेति
स्याणुर्वा पुरुषो वेत्यनात्मसंशयः आत्मसंशयोनेकविधः तथाहि आत्मा द्वितीयः सद्वितीयो वा अद्वि
तीयत्वेपि आनंदगुणकं वा आनंदस्वरूपं वेत्यादि परमात्मगतः संशयः आत्मा देहादि व्यतिरिक्तो वान
देहादिव्यतिरिक्तत्वेपि कर्ता वा अकर्ता वा अकर्तृत्वेपि चिद्रूपो वा अचिद्रूपो वा चिद्रूपत्वेपि आनंदात्मको वाऽन
वा इत्यादि जीवगतः संशयः जीवस्य सच्चिदानंदरूपत्वेपि परमात्मना सहैक्यं संभवति न वा एको
पि तद्ज्ञानं मोक्षसाधनं न वा मोक्षसाधनत्वेपि तद्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा केवलज्ञानं
वेत्यैक्यगत संशयः अयं सर्वोपि संशयो मननेन तर्केणात्मकेन निवर्तते तर्को नाम अनिष्टप्रसङ्गः
व्याप्यारोपेण व्यापकारोपापादनमिति यावत् व्याप्यस्याहार्यारोपो व्याप्यं व्याप्त्वेन रूपवत्त्वं व्यापकं
तथा च यदि प्रपंचः सत्यः स्यात् तर्हि अद्वितीयश्रुतिविरोधः स्यात् यदि परमात्मा जीवभिन्नः
स्यात्तर्हि घटादिवदनात्मा स्यात् यदि आनंदो न स्यात्तर्हि कोपि न व्याप्रियेत

दिव्याप्यारोपे व्यापकप्रसंजनं निष्पद्यते संशयविरोधिज्ञानं निश्चयः सच द्विविधः यथार्थोऽयथार्थश्चेति
अविसंवादी यथार्थनिश्चयः सचोक्त एव विसंवादी अयथार्थनिश्चयः सच द्विविधः तर्को विपर्ययश्चे
ति तर्कस्तूक्त एव विपर्ययो मिथ्याज्ञानं अतस्मिंस्तद्बुद्धिरिति यावत् सच द्विविधः निरुपाधिकः सो
पाधिकश्चेति तत्राद्यो द्विविधः बाह्य आभ्यंतरश्चेति शुक्त्यादाविदं रजतमित्यादिर्बाह्यः अहं मनुष्यो ब्राह्म
णो जानामीत्याद्याभ्यंतरः सोपाधिको द्विविधः बाह्य आभ्यंतरश्चेति लोहितः स्फटिक इत्यादिर्बाह्यः आ
काशादिप्रपंचभ्रमोऽपि बाह्यः सोपाधिकः कर्माऽविद्याकर्तृत्वात्तत्त्वज्ञानेनापि न निवर्तते यस्तन्निप्रारब्ध
क्षयपर्यंतं तस्य प्रपंचोपलब्धिदर्शनात् कर्तृत्वादिभ्रम आभ्यंतरः स्वप्नोऽप्याभ्यंतरः सोपाधिकभ्रमत्वेन
तु स्मृतिः तथाहि जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्भवे सकलविषयेंद्रियादि
वासनावासितं निद्रादोषोपप्लुतमंतःकरणं रथ्यादिविषयाकारेण ग्राहकेंद्रियाद्याकारेण रथ्या
दिविषयाकारवृत्याकारेण च परिणमते अंतःकरणोपहितसाक्षी स्वयमन्याऽनवभास्यस्तत्स
र्वमवभासयति अत एव स्वप्नसाक्षिणः स्वप्रकाशत्वं सुविज्ञेयं जाग्रदवस्थायांस्तु घटादिजडाभिः सं
कीर्णत्वात्साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयं स्वप्ने तु रथ्यादीनां जाग्रद्दर्शनानामपरत्वात्स्वप्रका

तै॰
सं॰
१७

शं बृविविदिर्जेण्वाक्यते तथा च श्रुतिः स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवतीति न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजतीत्यादिः स्वयंज्योतिः स्वप्रकाशश्चैतन्या विषयस्तिथावत् एवं स्वप्नोऽनुभवरूप एव न स्मृतिः अन्यथा रथ्यवश्यामीत्यनुभवविरोधप्रसङ्गात् स्वप्नपदार्था नाम अन्तःकरणमायाद्यास्यध्यस्तचैतन्याध्यस्तत्वेन इदानीं तत्कालात्तत्कालोत्पन्नाभावेऽपि सोपाधिकत्वपोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः कर्मनिमित्तोपप्लुतामन्तःकरणानुपाधिः केचित्तु स्व